# Nataraja Ashtakam

## નટરાજાષ્ટકમ્

## Document Information

Text title : naTarAjAShTakam

File name : naTarAjAShTakam.itx

Category : shiva

Location : doc_shiva

Latest update : October 3, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 3, 2021

*sanskritdocuments.org*

# નટરાજાષ્ટકમ્

કુઞ્ચરચર્મકૃતામ્બરમમ્બુરુહાસનમાધવગેયગુણં
શઙ્કરમન્તકમાનહરં સ્મરદાહકલોચનમેણધરમ્ ।
સાઞ્જલિયોગિપતઞ્જલિસન્નુતમિન્દુકલાધરમબ્જમુખં
મઞ્જુલશિઞ્જિતરઞ્જિતકુઞ્ચિતવામપદં ભજ નૃત્યપતિમ્ ॥ ૧॥

પિઙ્ગલતુઙ્ગજટાવલિભાસુરગઙ્ગમમઙ્ગલનાશકરં
પુઙ્ગવવાહમુમાઙ્ગધરં રિપુભઙ્ગકરં સુરલોકનતમ્ ।
ભૃઙ્ગવિનીલગલં ગણનાથસુતં ભજ માનસ પાપહરં
મઙ્ગલદં વરરઙ્ગપતિં ભવસઙ્ગહરં ધનરાજસખમ્ ॥ ૨॥

પાણિનિસૂત્રવિનિર્મિતિકારણપાણિલસડ્ડમરુત્થરવં
માધવનાદિતમર્દલનિર્ગતનાદલયોદ્ધૃતવામપદમ્ ।
સર્વજગત્પ્રલયપ્રભુવહ્નિવિરાજિતપાણિમુમાલસિતં
પન્નગભૂષણમુન્નતસન્નુતમાનમ માનસ સામ્બશિવમ્ ॥ ૩॥

ચણ્ડગુણાન્વિતમણ્ડલખણ્ડનપણ્ડિતમિન્દુકલાકલિતં
દણ્ડધરાન્તકદણ્ડકરં વરતાણ્ડવમણ્ડિતહેમસભમ્ ।
અણ્ડકરાણ્ડજવાહસખં નમ પાણ્ડવમધ્યમમોદકરં
કુણ્ડલશોભિતગણ્ડતલં મુનિવૃન્દનુતં સકલાણ્ડધરમ્ ॥ ૪॥

વ્યાઘ્રપદાનતમુગ્રતરાસુરવિગ્રહમર્દિપદામ્બુરુહં
શક્રમુખામરવર્ગમનોહરનૃત્યકરં શ્રુતિનુત્યગુણમ્ ।
વ્યગ્રતરઙ્ગિતદેવધુનીધૃતગર્વહરાયતકેશચયં
ભાર્ગવરાવણપૂજિતમીશમુમારમણં ભજ શૂલધરમ્ ॥ ૫॥

આસુરશક્તિવિનાશકરં બહુભાસુરકાયમનઙ્ગરિપું
ભૂસુરસેવિતપાદસરોરુહમીશ્વમક્ષરમુક્ષધૃતમ્ ।
ભાસ્કરશીતકરાક્ષમનાતુરમાશ્વરવિન્દપદં ભજ તં
નશ્વરસંસૃતિમોહવિનાશમહસ્કરદન્તનિપાતકરમ્ ॥ ૬॥

ભૂતિકરં સિતભૂતિધરં ગતનીતિહરં વરગીતિનુતં
  ભક્તિયુતોત્તમમુક્તિકરં સમશક્તિયુતં શુભભુક્તિકરમ્ ।
ભદ્રકરોત્તમનામયુતં શ્રુતિસામનુતં નમ સોમધરં
  સ્તુત્યગુણં ભજ નિત્યમગાધભવામ્બુધિતારકનૃત્યપતિમ્ ॥ ૭॥

શૂલધરં ભવજાલહરં નિટિલાગ્નિધરં જટિલં ધવલં
  નીલગલોજ્વલમઙ્ગલસદ્ગિરિરાજસુતામૃદુપાણિતલમ્ ।
શૈલકુલાધિપમૌલિનતં છલહીનમુપૈમિ કપાલધરં
  કાલવિષાશમનન્તમિલાનુતમદ્ભુતલાસ્યકરં ગિરિશમ્ ॥ ૮॥

ચિત્તહરાતુલનૃત્તપતિપ્રિયવૃત્તકૃતોત્તમગીતિમિમાં
  પ્રાતરુમાપતિસન્નિધિગો યદિ ગાયતિ ભક્તિયુતો મનસિ ।
સર્વસુખં ભુવિ તસ્ય ભવત્યમરાધિપદુર્લભમત્યધિકં
  નાસ્તિ પુનર્જનિરેતિ ચ ધામ સ શામ્ભવમુત્તમમોદકરમ્ ॥ ૯॥

ઇતિ નટરાજાષ્ટકં સમ્પૂર્ણમ્ ।

---

*Nataraja Ashtakam*

pdf was typeset on October 3, 2021

Please send corrections to *sanskrit@cheerful.com*